[1]जीवातुः, [2]जीमूतः, [3]जैवातृकः, [4]जीवन्तः.

## (607) "जु गतौ वेगे च" (I-भ्वादिः-अक. अनि. पर.)

सौत्रोऽयं धातुः साक्षाद्धातुपाठेष्वपठितोऽपि, 'जुचङ्क्रम्य—' (3-2-150), 'प्रजोरिनिः' (3-2-156), 'भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्' (3-2-177)' 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (3-3-97) इत्यादिषु अनुवादबलाद् अभ्युपगम्यते। 'वेगितायां गतौ' इति काशिकादिष्वर्थ-निर्देशस्योपलम्भात् तदनुसारेणास्माभिरप्यर्थोऽस्य निर्दिष्टः। क्षीरस्वामी तु 'जुङ्' इति ङितं पपाठ। वृत्तिन्यासपदमञ्जर्यादिषु अस्य धातोः सौत्रत्वमेवाङ्गीकृतम्। माधवधातुवृत्तौ तु परस्मैपदिष्वेव पाठोऽभ्युपगतः।

जावकः-विका, जावकः-विका, [5]जिजावयिषकः, [6]जुजूषकः-षिका, [7]जोजूयकः-यिका;

[8]जोता-त्री, जावयिता-त्री, जिजावयिषिता-त्री, जुजूषिता-त्री, जोजूयिता-त्री;

जवन्-न्ती, जावयन्-न्ती, जिजावयिषन्-न्ती, जुजूषन्-न्ती; —

जोष्यन्, जावयिष्यन्-न्ती-ती, जिजावयिषिष्यन्-न्ती-ती, जुजूषिष्यन्-न्ती-ती;

---

1. 'जीवेरातुः' [द. उ. 1. 132] इत्यातुप्रत्ययः। जीवन्ति प्राणिनोऽनेनेति जीवातुः=जीवनौषधम्, अन्नं च। 'जीवातुर्जीवनौषधम्।' इत्यमरः।
2. जीवनं=जलम्, मूतं=बद्धं येन स जीमूतः=मेघः। पृषोदरादित्वात् (6-3-109) जीवनशब्दस्य जीभावः।
3. 'जीवेरातृकन् वृद्धिश्च' (द. उ. 3. 1.) इत्यातृकन्प्रत्ययो वृद्धिश्च। जीवयतीति जैवातृकः=चन्द्रः।
4. 'रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि' [द. उ. 6-18) इति झच्प्रत्ययो भवत्याशिषि। जीवतात् जीवन्तः=आयुष्मान्, ऋषिविशेषश्च। स्त्रियां षित्वात् ङीष्। जीवन्ती=ओषधिविशेषः।
5. यद्यपि ण्यन्तात् सन्प्रत्यये रूपप्रदर्शनमस्माभिः न प्रतिज्ञातम्; अथापि, 'ओः पुयण्ज्यपरे' (7-4-80) इत्यनेनाभ्यासघटकोकारस्येत्वविधानसामर्थ्यात् तानि रूपाणि प्रकृते प्रदर्शितानि। एवं सर्वत्र ण्यन्तात् सनि अभ्यासे इकारो ज्ञेयः।
6. 'इको झल्' (1-2-9) इति सनः कित्त्वेन न गुणः। 'अज्झनगमां सनि' (6-4-16) इति दीर्घः। षत्वम्। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
7. अभ्यासस्य 'गुणो यङ्लुकोः' (7-4-82) इति गुणे, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः। एवं यङन्ते सर्वत्र ज्ञेयम्।
8. 'एकाच उपदेशेऽनुदात्तात्' (7-2-10) इतीण्णिषेधे गुणः। एवं तव्यदादिष्वपि ज्ञेयम्।